योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः १२

द्वादशः सर्गः १२

श्रीवसिष्ठ उवाच ।

एवं विचारयंस्तत्र स्वराज्ये जनको नृपः ।

चकाराखिलकार्याणि न मुमोह च धीरधीः ।। १

न मनः प्रोल्ललासास्य क्वचिदानन्दवृत्तिषु ।

केवलं सुषुप्तसंस्थं सदैव व्यवतिष्ठत ।। २

ततःप्रभृत्यसौ दृश्यं नाजहार न वात्यजत् ।

केवलं विगताशङ्क वर्तमाने व्यवस्थितः ।। ३

अनारतविवेकेन तेन सद्यः सनातनम् ।

पुनः कलङ्कं नैवाप्तमम्बरेणेव राजसम् ।। ४

स्वविवेकानुसंधानादिति तस्य महीपतेः ।

सम्यग्ज्ञानमनन्ताभमलं विमलतां ययौ ।। ५

अनामृष्टविकल्पांशुश्चिदात्मा विगतामयः ।

उदियाय हृदाकाशे तस्य व्योम्नीव भास्करः ।। ६

स ददर्शाखिलान्भावांश्चिच्छक्तौ समवस्थितान् ।

आत्मभूताननन्तात्मा सर्वभूतात्मकोविदः ।। ७

प्रहृष्टो न बभूवासौ क्वचिन्न च सुदुःखितः ।

प्रकृतेर्व्यवहारत्वात्सदैव सममानसः ।। ८

जीवन्मुक्तो बभूवासौ ततःप्रभृति मानदः ।

जनको जरठज्ञानी ज्ञातलोकपरावरः ।। ९

राज्यं कुर्वन्विदेहानां जनको जनजीवितम् ।

नैव हर्षविषादाभ्यां सोऽवशः परितप्यते ।। १०

नास्तमेति न चोदेति गुणदोषविचेष्टितैः ।। ११

अर्थानर्थैः स राज्योत्थैर्न ग्लायति न हृष्यति ।

कुर्वन्नपि करोत्येष न किंचिदपि कुत्रचित् ।

स तिष्ठत्येव सततं सर्वदैवान्तरे चितः ।। १२

सुषुप्तावस्थितस्यैव जनकस्य महीपतेः ।

भावनाः सर्वभावेभ्यः सर्वथैवास्तमागताः ।। १३

भविष्यं नानुसंधत्ते नातीतं चिन्तयत्यसौ ।

वर्तमाननिमेषं तु हसन्नेवानुवर्तते ।। १४

स्वविचारवशेनैव तेन तामरसेक्षण ।

प्राप्तं प्राप्यमशेषेण राम नेतरयेच्छया ।। १५

तावत्तावत्स्वकेनैव चेतसा प्रविचार्यते ।

यावद्यावद्विचाराणां सीमान्तः समवाप्यते ।। १६

न तद्गुरोर्न शास्त्रार्थान्न पुण्यात्प्राप्यते पदम् ।

यत्साधुसङ्गाभ्युदिताद्विचारविशदाद्धृदः ।। १७

सुन्दर्या निजया बुद्ध्या प्रज्ञयेव वयस्यया ।

पदमासाद्यते राम न नामक्रिययान्यया ।। १८

यस्योज्ज्वलति तीक्ष्णाग्रा पूर्वापरविचारिणी ।

प्रज्ञादीपशिखा जातु जाड्यान्ध्यं तं न बाधते ।। १९

दुरुत्तरा या विपदो दुःखकल्लोलसंकुलाः ।

तीर्यते प्रज्ञया ताभ्यो नावापद्भ्यो महामते ।। २०

प्रज्ञाविरहितं मूढमापदल्पापि बाधते ।

पेलवाचानिलकला सारहीनमिवोलपम् ।। २१

प्रज्ञावानसहायोऽपि विशास्त्रोऽप्यरिमर्दन ।

उत्तरत्येव संसारसागराद्राम पेलवात् ।। २२

प्रज्ञावानसहायोऽपि कार्यान्तमधिगच्छति ।

दुष्प्रज्ञः कार्यमासाद्य प्रधानमपि नश्यति ।। २३

शास्त्रसज्जनससर्गैः प्रज्ञां पूर्वं विवर्धयेत् ।

सेकसंरक्षणारम्भैः फलप्राप्तौ लतामिव ।। २४

प्रज्ञाबलबृहन्मूलः काले सत्कार्यपादपः ।

फलं फलत्यतिस्वादु भासो बिम्बमिवैन्दवम् ।। २५

य एव यत्नः क्रियते बाह्यार्थोपार्जने जनैः ।

स एव यत्नः कर्तव्यः पूर्वं प्रज्ञाविवर्धने ।। २६

सीमान्तं सर्वदुःखानामापदां कोशमुत्तमम् ।

बीजं संसारवृक्षाणां प्रज्ञामान्द्यं विनाशयेत् ।। २७

स्वर्गाद्यद्यच्च पातालाद्राज्याद्यत्समवाप्यते ।

तत्समासाद्यते सर्वं प्रज्ञाकोशान्महात्मना ।। २८

प्रज्ञयोत्तीर्यते भीमात्तस्मात्संसारसागरात् ।

न दानैर्न च वा तीर्थैस्तपसा नच राघव ।। २९

यत्प्राप्ताः संपदं दैवीमपि भूमिचरा नराः ।

प्रज्ञापुण्यलतायास्तत्फलं स्वादु समुत्थितम् ।। ३०

प्रज्ञया नखरालूनमत्तवारणयूथपाः ।

जम्बुकैर्विजिताः सिंहाः सिंहैर्हरिणका इव ।। ३१

सामान्यैरपि भूपत्वं प्राप्तं प्रज्ञावशान्नरैः ।

स्वर्गापवर्गयोग्यत्वं प्राज्ञस्यैवेह दृश्यते ।। ३२

प्रज्ञया वादिनः सर्वे स्वविकल्पविलासिनः ।

जयन्ति सुभटप्रख्यान्नरानप्यतिभीरवः ।। ३३

चिन्तामणिरियं प्रज्ञा हृत्कोशस्था विवेकिनः ।

फलं कल्पलतेवैषा चिन्तितं संप्रयच्छति ।। ३४

भव्यस्तरति संसारं प्रज्ञयापोह्यतेऽधमः ।

शिक्षितः पारमाप्नोति नावा नाप्नोत्यशिक्षितः ।। ३५

धीः सम्यग्योजिता पारमसम्यग्योजिताऽऽपदम् ।

नरं नयति संसारे भ्रमन्ती नौरिवार्णवे ।। ३६

विवेकिनमसंमूढं प्राज्ञमाशागणोत्थिताः ।

दोषा न परिबाधन्ते सन्नद्धमिव सायकाः ।। ३७

प्रज्ञयेह जगत्सर्वं सम्यगेवाङ्ग दृश्यते ।

सम्यग्दर्शनमायान्ति नापदो नच संपदः ।। ३८

पिधानं परमार्कस्य जडात्मा विततोऽसितः ।

अहंकाराम्बुदो मत्तः प्रज्ञावातेन बाध्यते ।। ३९

पदमतुलमुपैतुमिच्छतोच्चैः

प्रथममियं मतिरेव लालनीया ।

फलमभिलषता कृषीवलेन

प्रथमतरं ननु कृष्यते धरैव ।। ४०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे प्रज्ञामाहात्म्यं नाम द्वादशः सर्गः ।। १२ ।।